# Natya Shastra Chapter 7

# નાટ્યશાસ્ત્રમ્ અધ્યાય ૭

## Document Information

Text title : naaTyashaastra adhyaaya 7

File name : natya07.itx

Category : nATyashAstra, major_works, bharata

Location : doc_z_misc_major_works

Author : Sage Bharata

Transliterated by : dpadmakar at hotmail.com

Proofread by : dpadmakar at hotmail.com

Latest update : May 24, 2001, March 19, 2011

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# Natya Shastra Chapter 7

# નાટ્યશાસ્ત્રમ્ અધ્યાય ૭

॥ શ્રીરસ્તુ ॥

ભરતમુનિપ્રણીતં નાટ્યશાસ્ત્રમ્

અથ સપ્તમોઽધ્યાયઃ ।

ભાવાનિદાનીં વ્યાખ્યાસ્યામઃ । અત્રાહ- ભાવા ઇતિ કસ્માત્ ।
કિં ભવન્તીતિ ભાવાઃ કિં વા ભાવયન્તીતિ ભાવાઃ । ઉચ્યતે -
વાગઙ્ગસત્ત્વોપેતાન્કાવ્યાર્થાન્ભાવયન્તીતિ ભાવા ઇતિ ।
ભૂ ઇતિ કરણે ધાતુસ્તથા ચ ભાવિતં વાસિતં
કૃતમિત્યનર્થાન્તરમ્ ।
લોકેઽપિ ચ પ્રસિદ્ધમ્ । અહો હ્યનેન ગન્ધેન રસેન વા સર્વમેવ
ભાવિતમિતિ ।
તચ્ચ વ્યાપ્ત્યર્થમ્ ।
શ્લોકાશ્ચાત્ર-
વિભાવેનાહૃતો યોઽર્થો હ્યનુભાવૈસ્તુ ગમ્યતે ।
વાગઙ્ગસત્ત્વાભિનયૈઃ સ ભાવ ઇતિ સંજ્ઞિતઃ ॥ ૧॥

વાગઙ્ગમુખરાગેણ સત્ત્વેનાભિનયેન ચ ।
કવેરન્તર્ગતં ભાવં ભાવયન્ભાવ ઉચ્યતે ॥ ૨॥

નાનાભિનયસમ્બદ્ધાન્ભાવયન્તિ રસાનિમાન્ ।
યસ્માતસ્માદમી ભાવા વિજ્ઞેયા નાટ્યયોક્તૃભિઃ ॥ ૩॥

અથ વિભાવ ઇતિ કસ્માત્ । ઉચ્યતે-વિભવો વિજ્ઞાનાર્થઃ ।
વિભાવઃ કારણં નિમિત્તં હેતુરિતિ પર્યાયાઃ । વિભાવ્યતેઽનેન
વાગઙ્ગસત્ત્વાભિનયા ઇત્યતો વિભાવઃ । યથા વિભાવિતં વિજ્ઞા-
તમિત્યનર્થાન્તરમ્ ।
અત્ર શ્લોકઃ -
બહવોઽર્થા વિભાવ્યન્તે વાગઙ્ગાભિનયાશ્રયાઃ ।

અનેન યસ્માત્તેનાયં વિભાવ ઇતિ સંજ્ઞિતઃ ॥ ૪॥

અથાનુભાવ ઇતિ કસ્માત્ । ઉચ્યતે-
અનુભાવ્યતેઽનેન વાગઙ્ગસત્ત્વકૃતોઽભિનય ઇતિ ।
અત્ર શ્લોકઃ -
વાગઙ્ગાભિનયેનેહ યતસ્ત્વર્થોઽનુભાવ્યતે ।
શાખાઙ્ગોપાઙ્ગસંયુક્તસ્ત્વનુભાવસ્તતઃ સ્મૃતઃ ॥ ૫ ॥

એવં તે વિભાવાનુભાવસંયુક્તા ભાવા ઇતિ વ્યાખ્યાતાઃ । અતો
હ્યેષાં ભાવાનાં સિદ્ધિર્ભવતિ । તસ્માદેષાં ભાવાનાં
વિભાવાનુભાવસંયુક્તાનાં લક્ષણનિદર્શનાન્યભિવ્યાખ્યાસ્યામઃ ।
તત્ર વિભાવાનુભાવૌ લોકપ્રસિદ્ધૌ ।
લોકસ્વભાવાનુગતત્વાચ્ચ તયોર્લક્ષણં
નોચ્યતેઽતિપ્રસઙ્ગનિવૃત્યર્થમ્ ।
ભવતિ ચાત્ર શ્લોકઃ -
લોકસ્વભાવસંસિદ્ધા લોકયાત્રાનુગામિનઃ ।
અનુભાવા વિભાવાશ્ચ જ્ઞેયાસ્ત્વભિનયે બુધૈઃ ॥ ૬॥

તત્રાષ્ટૌ ભાવાઃ સ્થાયિનઃ । ત્રયસ્ત્રિંશદ્વ્યભિચારિણઃ ।
અષ્ટૌ
સાત્વિકા ઇતિ ભેદાઃ । એવમેતે કાવ્યરસાભિવ્યક્તિહેતવ
એકોનપઞ્ચાશદ્ભાવાઃ
પ્રત્યવગન્તવ્યાઃ । એભ્યશ્ચ સામાન્યગુણયોગેન રસા નિષ્પદ્યન્તે ।
અત્ર શ્લોકઃ-
યોઽર્થો હૃદયસંવાદી તસ્ય ભાવો રસોદ્ભવઃ ।
શરીરં વ્યાપ્યતે તેન શુષ્કં કાષ્ઠમિવાગ્નિના ॥ ૭॥

અત્રાહ- યદિ
કાવ્યાર્થસંશ્રિતૈર્વિભાવાનુભાવવ્યઞ્જિતૈરેકોનપઞ્ચાશદ્ભાવૈઃ
સામાન્યગુણયોગેનાભિનિષ્પદ્યન્તે રસાસ્તત્કથં સ્થાયિન એવ ભાવા
રસત્વમાપ્નુઅવન્તિ । ઉચ્યતે- યથા હિ
સમાનલક્ષણાસ્તુલ્યપાણિપાદોદરશરીરાઃ
સમાનાઙ્ગપ્રત્યઙ્ગા અપિ પુરુષાઃ
કુલશીલવિદ્યાકર્મશિલ્પવિચક્ષણત્વાદ્રાજ-

ત્વમાપ્નુવન્તિ તત્રૈવ ચાન્યેऽલ્પબુદ્ધયસ્તેષામેવાનુચરા ભવન્તિ
તથા
વિભાવાનુભાવવ્યભિચારિણઃ સ્થાયિભાવાનુપાશ્રિતા ભવન્તિ ।
બહ્વાશ્રયત્વાસ્વામિભૂતાઃ સ્થાયિનો ભાવાઃ ।
તદ્વત્સ્થાનીયપુરુષગુણભૂતા અન્યે ભાવાસ્તાન્ગુણતયા શ્રયન્તે ।
સ્થાયિભાવા રસત્વમાપ્નુવન્તિ । પરિજનભૂતા વ્યભિચારિણો
ભાવાઃ ।
અત્રાહ- કો દૃષ્ટાન્ત ઇતિ । યથા નરેન્દ્રો બહુજનપરિવારોऽપિ સ
એવ નામ
લભતે નાન્યઃ સુમહાનપિ પુરુષઃ તથા
વિભાવાનુભાવવ્યભિચારિપરિવૃતઃ
સ્થાયી ભાવો રસનામ લભતે ।
ભવતિ ચાત્ર શ્લોકઃ -
યથા નરાણાં નૃપતિઃ શિષ્યાણાં ચ યથા ગુરુઃ ।
એવં હિ સર્વભાવાનાં ભાવઃ સ્થાયિ મહાનિહ ॥ ૮॥

લક્ષણં ખલુ પૂર્વમભિહિતમેષાં રસસંજ્ઞકાનામ્ । ઇદાનીં
ભાવસામાન્યલક્ષણમભિધાસ્યામઃ । તત્ર સ્થાયિભાવાન્વક્ષ્યામઃ -

રતિર્નામ પ્રમોદાત્મિકા
ઋતુમાલ્યાનુલેપનાભરણભોજનવરભવનાનુભવના-
પ્રાતિકૂલ્યાદિભિર્વિભાવૈઃ સમુત્પદ્યતે ।
તામભિનયેત્સ્મિતવદનમધુરકથન-
ભ્રૂક્ષેપકટાક્ષાદિભિરનુભાવૈઃ । અત્ર શ્લોકઃ -
ઇષ્ટાર્થવિષયપ્રાપ્ત્યા રતિરિત્યુપજાયતે ।
સૌમ્યત્વાદભિનેયા સા વાઙ્માધુર્યાઙ્ગચેષ્ટિતૈઃ ॥ ૯॥

હાસો નામ
પરચેષ્ટાનુકરણકુહકાસમ્બદ્ધપ્રલાપપૌરોભાગ્યમૌર્ખ્યાદિભિર્વિભાવૈઃ
સમુત્પદ્યતે । તમભિનયેત્પૂર્વોક્તૈર્હસિતાદિભિરનુભાવૈઃ ।
ભવતિ ચાત્ર શ્લોકઃ -
પરચેષ્ટાનુકરણાદ્ધાસઃ સમુપજાયતે ।
સ્મિતહાસાતિહસિતૈરભિનેયઃ સ પણ્ડિતૈઃ ॥ ૧૦॥

શોકો નામ
ઇષ્ટજનવિયોગવિભવનાશવધબન્ધદુઃખાનુભનવનાદિભિર્વિભાવૈઃ
સમુત્પદ્યતે।
તસ્યાસ્રપાતપરિદેવિતવિલપિતવૈવર્ણ્યસ્વરભેદસ્રસ્તગાત્રતાભૂમિ-
પતનસસ્વનરુદિતાક્રન્દિતદીર્ઘનિઃશ્વસિતજડતોન્માદમોહમરણાદિભિરનુભા-
વૈરભિનયઃ પ્રયોક્તવ્યઃ ।
રુદિતમત્ર ત્રિવિધમ્ - આનન્દજમાર્તિજમીર્ષ્યાસમુદ્ભવં ચેતિ ।
ભવન્તિ ચાત્રાર્યાઃ -
[આનન્દેઽપ્યાર્તિકૃતં ત્રિવિધં રુદિતં સદા બુધૈર્જ્ઞેયમ્ ।
તસ્ય ત્વભિનયયોગાન્વિભાવગતિતઃ પ્રવક્ષ્યામિ ॥]
હર્ષોત્ફુલ્લકપોલં સાનુસ્મરણાદપાઙ્ગવિસૃતાસ્રમ્ ।
રોમાઞ્ચગાત્રમનિભૃતમાનન્દસમુદ્ભવં ભવતિ ॥ ૧૧॥

પર્યાપ્તવિમુક્તાસ્રં સસ્વનમસ્વસ્થગાત્રગતિચેષ્ટમ્ ।
ભૂમિનિપાતનિવર્તિતવિલપિતમિત્યાર્તિજં ભવતિ ॥ ૧૨॥

પ્રસ્ફુરિતૌષ્ઠકપોલં સશિરઃકમ્પં તથા સનિઃશ્વાસમ્ ।
ભ્રુકુટીકટાક્ષકુટિલં સ્ત્રીણામીર્ષ્યાકૃતં ભવતિ ॥ ૧૩॥

સ્ત્રીનીચપ્રકૃતિષ્વેષ શોકો વ્યસનસમ્ભવઃ ।
ધૈર્યેણોત્તમમધ્યાનાં નીચાનાં રુદિતેન ચ ॥ ૧૪॥

ક્રોધો નામ
આધર્ષણાક્રુષ્ટકલહવિવાદપ્રતિકૂલાદિભિર્વિભાવૈઃ
સમુત્પદ્યતે । અસ્ય
વિકૃષ્ટનાસાપુટોદ્વૃત્તનયનસંદષ્ઠોષ્ઠપુટ-
ગણ્ડસ્ફુરણાદિભિરનુભાવૈરભિનયઃ પ્રયોક્તવ્યઃ ।
રિપુજો ગુરુજશ્ચૈવ પ્રણયિપ્રભવસ્તથા ।
ભૃત્યજઃ કૃતકશ્ચેતિ ક્રોધઃ પઞ્ચવિધઃ સ્મૃતઃ॥ ૧૫॥

અત્રાર્યા ભવન્તિ -
ભૃકુટીકુટિલોત્કટમુખઃ સન્દષ્ઠોષ્ઠઃ સ્પૃશન્કરેણ કરમ્ ।
ક્રુદ્ધઃ સ્વભુજાપ્રેક્ષી શત્રૌ નિર્યન્ત્રણં રુષ્યેત્ ॥ ૧૬॥

કિઞ્ચિદવાઙ્ગ્મુખદૃષ્ટિઃ સાસ્રસ્વેદાપમાર્જનપરશ્ચ ।
અવ્યક્તોલ્બણચેષ્ટો ગુરૌ વિનયયન્ત્રિતો રુષ્યેત્ ॥ ૧૭॥

અલ્પપ્રતરવિચારો વિકિરન્નશ્રૂણ્યપાઙ્ગવિક્ષેપૈઃ ।
સભ્રુકુટિસ્ફુરિતોષ્ઠઃ પ્રણયોપગતાં પ્રિયા રુષ્યેત્ ॥ ૧૮॥

અથ પરિજને તુ રોષસ્તર્જનનિર્ભર્ત્સનાક્ષિવિસ્તારૈઃ ।
વિપ્રેક્ષણૈશ્ચ વિવિધૈરભિનેયઃ ક્રૂરતારહિતઃ ॥ ૧૯॥

કારણમવેક્ષમાણઃ પ્રાયેણાયાસલિઙ્ગસંયુક્તઃ ।
વીરરસાન્તરચારી કાર્યઃ કૃતકો ભવતિ કોપઃ ॥ ૨૦॥

ઉત્સાહો નામ ઉત્તમપ્રકૃતિઃ। સ
ચાવિષાદશક્તિધૈર્યશૌર્યાદિભિર્વિભાવૈ-
રુત્પદ્યતે। તસ્ય ધૈર્યત્યાગવૈશારદ્યાદિભિરનુભાવૈરભિનયઃ
પ્રયોક્તવ્યઃ ।
અત્ર શ્લોકઃ -

અસમ્મોહાદિભિર્વ્યક્તો વ્યવસાયનયાત્મકઃ ।
ઉત્સાહસ્ત્વભિનેયઃ સ્યાદપ્રમાદોત્થિતાદિભિઃ ॥ ૨૧॥

ભયં નામ સ્ત્રીનીચપ્રકૃતિકમ્ ।
ગુરુરાજાપરાધશ્વાપદશૂન્યાગારાટવીપર્વતગહનગજાહિદર્શનનિર્ભર્ત્સન-કાન્તારદુર્દિનનિશાન્ધકરોલૂકનક્તઞ્ચરારાવશ્રવણાદિભિ
સમુત્પદ્યતે ।
તસ્ય
પ્રકમ્પિતકરચરણહૃદયકમ્પનસ્તમ્ભમુખશોષજિહ્વાપરિલેહન-
સ્વેદવેપથુત્રાસસપરિત્રાણાન્વેષણધાવનોત્કૃષ્ટાદિભિરનુભવૈરભિનયઃ
પ્રયોક્તવ્યઃ ।
અત્ર શ્લોકાઃ -

ગુરુરાજાપરાધેન રૌદ્રાણાં ચાપિ દર્શનાત્ ।
શ્રવણાદપિ ઘોરાણાં ભયં મોહેન જાયતે ॥ ૨૨॥

ગાત્રકમ્પનવિત્રાસૈર્વક્ત્રશોષણસમ્ભ્રમૈઃ
વિસ્ફારિતૈક્ષણૈઃ કાર્યમભિનેયક્રિયાગુણૈઃ ॥ ૨૩॥

સત્ત્વવિત્રાસનોદ્ભૂતં ભયમુત્પદ્યતે નૃણામ્ ।
સ્રસ્તાઙ્ગાક્ષિનિમેષૈસ્તદભિનેયં તુ નર્તકૈઃ ॥ ૨૪॥

અત્રાર્યા ભવતિ -

કરચરણહૃદયકમ્પૈર્મુખશોષણવદનલેહનસ્તમ્ભૈઃ ।
સમ્ભ્રાન્તવદનવેપથુસંત્રાસકૃતૈરભિનયોऽસ્ય ॥ ૨૫॥

જુગુપ્સા નામ સ્ત્રીનીચપ્રકૃતિકા । સા
ચાહૃદ્યદર્શનશ્રવણાદિભિર્વિભાવૈઃ
સમુત્પદ્યતે । તસ્યાઃ
સર્વાઙ્ગસઙ્કોચનિષ્ઠીવનમુખવિકૂણનહૃલ્લેખાદિ-
ભિરનુભાવૈરભિનયઃ પ્રયોક્તવ્યઃ ।
ભવતિ ચાત્ર શ્લોકઃ -
નાસાપ્રચ્છાદનેનેહ ગાત્રસઙ્કોચનેન ચ ।
ઉદ્વેજનૈઃ સહૃલ્લેખૈર્જુગુપ્સામભિનિર્દિશેત્ ॥ ૨૬॥

વિસ્મયો નામ
માયેન્દ્રજાલમાનુષકર્માતિશયચિત્રપુસ્તશિલ્પવિદ્યાતિશયાદિભિર્વિભાવૈઃ
સમુત્પદ્યતે । તસ્ય
નયનવિસ્તારાનિમેષપ્રેક્ષિતભ્રૂક્ષેપરોમહર્ષણશિરઃકમ્પસાધુવાદાદિભિ-
રનુભાવૈરભિનયઃ પ્રયોક્તવ્યઃ ।
ભવતિ ચાત્ર શ્લોકઃ -
કર્માતિશયનિર્વૃત્તો વિસ્મયો હર્ષસમ્ભવઃ ।
સિદ્ધિસ્થાને ત્વસૌ સાધ્યઃ પ્રહર્ષપુલકાદિભિઃ ॥ ૨૭॥

એવમેતે સ્થાયિનો ભાવા રસસંજ્ઞાઃ પ્રત્યવગન્તવ્યાઃ ।

વ્યભિચારિણ ઇદાનીં વ્યાખ્યાસ્યામઃ । અત્રાહ - વ્યભિચારિણ ઇતિ
કસ્માત્ ।
ઉચ્યતે - વિ અભિ ઇત્યેતાવુપસર્ગૌ । ચર ઇતિ ગત્યર્થો ધાતુઃ ।
વિવિધમાભિમુખ્યેન
રસેષુ ચરન્તીતિ વ્યભિચારિણઃ । વાગઙ્ગસત્ત્વોપેતાઃ પ્રયોગે
રસાન્નયન્તીતિ
વ્યભિચારિણઃ । અત્રાહ - કથં નયન્તીતિ । ઉચ્યતે - લોકસિદ્ધાન્ત
એષઃ -
યથા સૂર્ય ઇદં દિનં નક્ષત્રં વા નયતીતિ । ન ચ તેન
બાહુભ્યાં સ્કન્ધેન
વા નીયતે । કિં તુ લોકપ્રસિદ્ધમેતત્ । યથેદં સૂર્યો નક્ષત્રં દિન
વા નયતીતિ ।
એવમેતે વ્યભિચારિણ ઇત્યવગન્તવ્યાઃ । તાનિહ સઙ્ગ્રહાભિહિતાંસ્ત્ર-

યસ્ત્રિંશદ્વ્યભિચારિણો ભાવાન્ વર્ણયિષ્યામઃ ।

તત્ર નિર્વેદો નામ
દારિદ્ર્યવ્યાધ્યવમાનાધિક્ષેપાક્રુષ્ટક્રોધતાડનેષ્ટજન-
વિયોગતત્ત્વજ્ઞાનાદિભિર્વિભાવૈઃ સમુત્પદ્યતે સ્ત્રીનીચકુસત્ત્વાનામ્
।
રુદિતનિઃશ્વસિતોચ્છ્વસિતસમ્પ્રધારણાદિભિરનુભાવૈસ્તમભિનયેત્ ।
અત્ર શ્લોકઃ -
દારિદ્ર્યેષ્ટવિયોગાદ્યૈઃ નિર્વેદો નામ જાયતે ।
સમ્પ્રધારણનિઃશ્વાસૈસ્તસ્ય ત્વભિનયો ભવેત્ ॥ ૨૮॥

અત્રાનુવંશ્યે આર્યે ભવતઃ -
ઇષ્ટજનવિપ્રયોગાદ્દારિદ્ર્યાદ્વ્યાધિતસ્તથા દુઃખાત્ ।
ઋદ્ધિં પરસ્ય દૃષ્ટ્વા નિર્વેદો નામ સમ્ભવતિ ॥ ૨૯॥

બાષ્પપરિપ્લુતનયનઃ પુનશ્ચ નિઃશ્વાસનદીનમુખનેત્રઃ ।
યોગીવ ધ્યાનપરો ભવતિ હિ નિર્વેદવાન્પુરુષઃ ॥ ૩૦॥

ગ્લાનિર્નામ વાન્તવિરિક્તવ્યાધિતપોનિયમોપવાસમનસ્તાપાતિશયમદન-
સેવનાતિવ્યાયામાધ્વગમનક્ષુત્પિપાસાનિદ્રાચ્છેદાદિભિર્વિભાવૈઃ
સમુત્પદ્યતે । તસ્યાઃ ક્ષામવાક્યનયનકપોલોદરમન્દપદોત્ક્ષેપણવેપના-
નુત્સાહતનુગાત્રવૈવર્ણ્યસ્વરભેદાભિરનુભાવૈરભિનયઃ પ્રયોક્તવ્યઃ
।
અત્રાર્યે ભવતઃ -
વાન્તવિરિક્તવ્યાધિષુ તપસા જરસા ચ જાયતે ગ્લાનિઃ ।
કાર્શ્યેન સાભિનેયા મન્દભ્રમણેન કમ્પેન ॥ ૩૧॥

ગદિતૈઃ ક્ષામક્ષામૈર્નેત્રવિકારૈશ્ચ દીનસઞ્ચારૈઃ ।
શ્લથભાવેનાઙ્ગાનાં મુહુર્મુહુર્નિર્દિશેદ્ ગ્લાનિમ્ ॥ ૩૨॥

શઙ્કા નામ સન્દેહાત્મિકા સ્ત્રીનીચપ્રભવા । ચૌર્યાભિગ્રહણ-
નૃપાપરાધપાપકર્મકરણાદિભિર્વિભાવૈઃ સમુત્પદ્યતે । તસ્યા
મુહુર્મુહુરવલોકનાવકુણ્ઠનમુખશોષણજિહ્વાલેહનમુખવૈવર્ણ્ય-
સ્વરભેદવેપથુશુષ્કોષ્ઠકણ્ઠાયાસસાધર્મ્યાદિભિરનુભાવૈરભિનયઃ
પ્રયોક્તવ્યઃ ।
ચૌર્યાદિજનિતા શઙ્કા પ્રાયઃ કાર્યા ભયાનકે ।

પ્રિયવ્યલીકજનિતા તથા શ‍ृઙ્ગારિણી મતા ॥ ૩૩॥

અત્રાકારસંવરણમપિ કેચિદિચ્છન્તિ । તચ્ચ
કુશલૈરુપાધિભિરિઙ્ગિતૈશ્ચોપલક્ષ્યમ્ ।
અત્રાર્યે ભવતઃ -
દ્વિવિધા શઙ્કા કાર્યાહ્યાત્મસમુત્થા ચ પરસમુત્થા ચ ।
યા તત્રાત્મસમુત્થા સા જ્ઞેયા દૃષ્ટિચેષ્ટાભિઃ ॥ ૩૪॥

કિઞ્ચિત્પ્રવેપિતાઙ્ગસ્ત્વધોમુખો વીક્ષતે ચ પાર્શ્વાનિ ।
ગુરુસજ્જમાનજિહ્વઃ શ્યામાસ્યઃ શઙ્કિતઃ પુરુષઃ ॥ ૩૫॥

અસૂયા નામ
નાનાપરાધદ્વેષપરૈશ્વર્યસૌભાગ્યમેધાવિદ્યાલીલાદિભિર્વિભાવૈઃ
સમુત્પદ્યતે । તસ્યાશ્ચ પરિષદિ
દોષપ્રખ્યાપનગુણોપઘાતેર્ષ્યાચક્ષુઃપ્રદા-
નાધોમુખભ્રુકુટીક્રિયાવજ્ઞાનકુત્સનાદિભિરનુભાવૈરભિનયઃ
પ્રયોક્તવ્યઃ ।
અત્રાર્યે ભવતઃ -
પરસૌભાગ્યેશ્વરતામેધાલીલાસમુચ્છ્રયાન્દૃષ્ટ્વા ।
ઉત્પદ્યતે હ્યસૂયા કૃતાપરાધો ભવેદ્યશ્ચ ॥ ૩૬॥

ભ્રુકુટિકુટિલોત્કટમુખૈઃ સેર્ષ્યાક્રોધપરિવૃત્તનેત્રૈશ્ચ ।
ગુણનાશનવિદ્વેષૈસ્તત્રાભિનયઃ પ્રયોક્તવ્યઃ ॥ ૩૭॥

મદો નામ મદ્યોપયોગાદુત્પદ્યતે । સ ચ ત્રિવિધઃ પઞ્ચવિભાવશ્ચ ।
અત્રાર્યા ભવન્તિ -
જ્ઞેયસ્તુ મદસ્ત્રિવિધસ્તરુણો મધ્યસ્તથાવકૃષ્ટશ્ચ ।
કરણં પઞ્ચવિધં સ્યાત્તસ્યાભિનયઃ પ્રયોક્તવ્યઃ ॥ ૩૮॥

કશ્ચિન્મત્તો ગાયતિ રોદિતિ કશ્ચિત્તથા હસતિ કશ્ચિત્ ।
પરુષવચનાભિધાયી કશ્ચિત્કશ્ચિત્તથા સ્વપિતિ ॥ ૩૯॥

ઉત્તમસત્ત્વઃ શેતે હસતિ ચ ગાયતિ ચ મધ્યમપ્રકૃતિઃ ।
પરુષવચનાભિધાયી રોદત્યપિ ચાધમપ્રકૃતિઃ ॥ ૪૦॥

સ્મિતવચનમધુરરાગો હૃષ્ટતનુઃ કિઞ્ચિદાકુલિતવાક્યઃ ।
સુકુમારાવિદ્ધગતિસ્તરુણમદસ્તૂત્તમપ્રકૃતિઃ ॥૪૧॥

સ્ખલિતાઘૂર્ણિતનયનઃ સ્રસ્તવ્યાકુલિતબાહુવિક્ષેપઃ ।
કુટિલવ્યાવિદ્ધગતિર્મધ્યમદો મધ્યમપ્રકૃતિઃ ॥ ૪૨॥

નષ્ટસ્મૃતિર્હતગતિશ્છર્દિતહિક્કાકફૈઃ સુબીભત્સઃ ।
ગુરુસજ્જમાનજિહ્વો નિષ્ઠીવતિ ચાધમપ્રકૃતિઃ ॥ ૪૩॥

રઙ્ગે પિબતઃ કાર્યા મદવૃદ્ધિર્નાટ્યયોગમાસાદ્ય ।
કાર્યો મદક્ષયો વૈ યઃ ખલુ પીત્વા પ્રવિષ્ટઃ સ્યાત્ ॥ ૪૪॥

સન્ત્રાસાચ્છોકાદ્વા ભયાત્પ્રહર્ષાચ્ચ કારણોપગતાત્ ।
ઉત્ક્રમ્યાપિ હિ કાર્યો મદપ્રણાશઃ ક્રમાત્તજ્જ્ઞૈઃ ॥ ૪૫॥

એભિર્ભાવવિશેષૈર્મદો દ્રુતં સમ્પ્રણાશમુપયાતિ ।
અભ્યુદયસુખૈર્વાક્યૈર્યથૈવ શોકઃ ક્ષયં યાતિ ॥ ૪૬॥

શ્રમો નામ અધ્વવ્યાયામસેવનાદિભિર્વિભાવૈઃ સમુત્પદ્યતે। તસ્ય
ગાત્રપરિમર્દનસંવાહનનિઃશ્વસિતવિજૃમ્ભિતમન્દપદોત્ક્ષેપણનયન-
વદનવિકૂણનસીત્કરાદિભિરનુભાવૈરભિનયઃ પ્રયોક્તવ્યઃ ।
અત્રાર્યા -
નૃત્તાધ્વવ્યાયામાન્નરસ્ય સઞ્જાયતે શ્રમો નામ ।
નિઃશ્વાસખેદગમનૈસ્તસ્યાભિનયઃ પ્રયોક્તવ્યઃ ॥ ૪૭॥

આલસ્યં નામ ખેદવ્યાધિગર્ભસ્વભાવશ્રમસૌહિત્યાદિભિર્વિભાવૈઃ
સમુત્પદ્યતે સ્ત્રીનીચાનામ્ ।
તદભિનયેત્સર્વકર્માનભિલાષશયના-
સનનિદ્રાતન્દ્રીસેવનાદિભિરનુભાવૈઃ ।
અત્રાર્યા -
આલસ્યં ત્વભિનેયં ખેદાપગતં સ્વભાવજં ચાપિ ।
આહારવર્જિતાનામારમ્ભાણામનારમ્ભાત્ ॥ ૪૮॥

દૈન્યં નામ દૌર્ગત્યમનસ્તાપાદિભિર્વિભાવૈઃ સમુત્પદ્યતે ।
તસ્યાધૃતિશિરોરોગગાત્રગૌરવાન્યમનસ્કતામૃજાપરિવર્જના-
દિભિરનુભાવૈરભિનયઃ પ્રયોક્તવ્યઃ ।
અત્રાર્યા -
ચિન્તૌત્સુક્યસમુત્થા દુઃખાદ્યા ભવતિ દીનતાં પુંસામ્ ।
સર્વમૃજાપરિહારૈર્વિવિધોઽભિનયો ભવેત્તસ્ય ॥ ૪૯॥

ચિન્તા નામ
ઐશ્વર્યભ્રંશેષ્ટદ્રવ્યાપહારદારિદ્યાદિભિર્વિભાવૈરુત્પદ્યતે ।
તામભિનયેન્નિઃશ્વસિતોચ્છ્વસિતસન્તાપધ્યાનાધોમુખચિન્તન-
તનુકાર્શ્યાદિભિરનુભાવૈઃ ।
અત્રાર્યે ભવતઃ -
ઐશ્વર્યભ્રંશેષ્ટદ્રવ્યક્ષયજા બહુપ્રકારા તુ ।
હૃદયવિતર્કોપગતા નૃણાં ચિન્તા સમુદ્ભવતિ ॥ ૫૦॥

સોચ્છ્વાસૈર્નિઃશ્વસિતૈઃ સન્તાપૈશ્ચૈવ હૃદયશૂન્યતયા ।
અભિનેતવ્યા ચિન્તા મૃજાવિહીનૈરધૃત્યા ચ ॥ ૫૧॥

મોહો નામ દૈવોપઘાતવ્યસનાભિઘાતવ્યાધિભયાવેગપૂર્વવૈરા-
નુસ્મરણાદિભિર્વિભાવૈઃ સમુત્પદ્યતે । તસ્ય નિશ્ચૈતન્યભ્રમણ-
પતનાઘૂર્ણનાદર્શનાદિભિરનુભાવૈરભિનયઃ પ્રયોક્તવ્યઃ ।
અત્ર શ્લોકસ્તાવદાર્યા ચ -
અસ્થાને તસ્કરાન્દૃષ્ટ્વા ત્રાસનૈર્વિવિધૈરપિ ।
તત્પ્રતીકારશૂન્યસ્ય મોહઃ સમુપજાયતે ॥ ૫૨॥

વ્યસનાભિઘાતભયપૂર્વવૈરસંસ્મરણરોગજો મોહઃ ।
સર્વેન્દ્રિયસમ્મોહાત્તસ્યાભિનયઃ પ્રયોક્તવ્યઃ ॥ ૫૩॥

સ્મૃતિર્નામ સુખદુઃખકૃતાનાં ભાવાનામનુસ્મરણમ્ ।
સા ચ સ્વાસ્થ્યજઘન્યરાત્રિનિદ્રાચ્છેદસમાનદર્શનોદાહરણ-
ચિન્તાભ્યાસાદિભિર્વિભાવૈઃ સમુત્પદ્યતે । તામભિનયે-
ચ્છિરઃકમ્પનાવલોકનભ્રૂસમુન્નમનાદિભિરનુભાવૈઃ ।
અત્રાર્યે ભવતઃ -
સુખદુઃખમતિક્રાન્તં તથા મતિવિભાવિતં યથાવૃત્તમ્ ।
ચિરવિસ્મૃતં સ્મરતિ યઃ સ્મૃતિમાનિતિ વેદિતવ્યોઽસૌ ॥ ૫૪॥

સ્વાસ્થ્યાભ્યાસસમુત્થા શ્રુતિદર્શનસમ્ભવા સ્મૃતિર્નિપુણૈઃ ।
શિર ઉદ્વાહનકમ્પૈર્ભૂક્ષેપૈશ્ચાભિનેતવ્યા ॥ ૫૫॥

ધૃતિર્નામ શૌર્યવિજ્ઞાનશ્રુતિવિભવશૌચાચારગુરુભક્ત્યધિક-
મનોરથાર્થલાભક્રીડાદિભિર્વિભાવૈઃ સમુત્પદ્યતે ।
તામભિનયેત્પ્રા-
પ્તાનાં વિષયાણામુપભોગાદપ્રાપ્તાતીતોપહૃતવિનષ્ટાનામનુ-

શોચનાદિભિરનુભાવૈઃ ।
અત્રાર્યે ભવતઃ -
વિજ્ઞાનશૌચવિભવશ્રુતિશક્તિસમુદ્ભવા ધૃતિઃ સદ્ભિઃ ।
ભયશોકવિષદાદ્યૈ રહિતા તુ સદા પ્રયોક્તવ્યા ॥ ૫૬॥

પ્રાપ્તાનામુપભોગઃ શબ્દરસસ્પર્શરૂપગન્ધાનામ્ ।
અપ્રાપ્તૈશ્ચ ન શોકો યસ્યાં હિ ભવેદ્ ધૃતિઃ સા તુ ॥ ૫૭॥

વ્રીડા નામ અકાર્યકરણાત્મિકા । સા ચ
ગુરુવ્યતિક્રમણાવજ્ઞાન-પ્રતિજ્ઞાતાનિર્વહનપશ્ચાત્તાપાદિભિર્વિભાવૈઃ
સમુત્પદ્યતે ।
તાં નિગૂઢવદનાધોમુખવિચિન્તનોર્વીલેખનવસ્ત્રાઙ્ગુલીયકસ્પર્શ-
નખનિકૃન્તનાદિભિરનુભાવૈરભિનયેત્ ।
અત્રાર્યે ભવતઃ -
કિઞ્ચિદકાર્યં કુર્વન્નેવં યો દૃશ્યતે શુચિભિરન્યૈઃ ।
પશ્ચાત્તાપેન યુતો વ્રીડિત ઇતિ વેદિતવ્યોઽસૌ ॥ ૫૮॥

લજ્જાનિગૂઢવદનો ભૂમિં વિલિખન્નખાંશ્ચ વિનિકૃન્તન્ ।
વસ્ત્રાઙ્ગુલીયકાનાં સંસ્પર્શં વ્રીડિતઃ કુર્યાત્ ॥ ૫૯॥

ચપલતા નામ રાગદ્વેષમાત્સર્યામર્ષાપ્રતિકૂલ્યાદિભિર્વિભાવૈઃ
સમુત્પદ્યતે । તસ્યાશ્ચ વાક્પારુષ્યનિર્ભર્ત્સનવધબન્ધસમ્પ્રહાર-
તાડનાદિભિરનુભાવૈરભિનયઃ પ્રયોક્તવ્યઃ ।
અત્રાર્યા ભવતિ -
અવિમૃશ્ય તુ યઃ કાર્યં પુરુષો વધતાડનં સમારભતે ।
અવિનિશ્ચિતકારિત્વાત્સ તુ ખલુ ચપલો બુધૈર્જ્ઞેયઃ ॥ ૬૦॥

હર્ષો નામ મનોરથલાભેષ્ટજનસમાગમનમનઃપરિતોષદેવ-
ગુરુરાજભર્તૃપ્રસાદભોજનાચ્છાદનલાભોપભોગાદિભિર્વિભાવૈઃ
સમુત્પદ્યતે । તમભિનયેન્નયનવદનપ્રસાદપ્રિયભાષણાલિઙ્ગન-
કણ્ટકિતપુલકિતાસ્રસ્વેદાદિભિરનુભાવૈઃ ।
અત્રાર્યે ભવતઃ -
અપ્રાપ્યે પ્રાપ્યે વા લબ્ધેઽર્થે પ્રિયસમાગમે વાઽપિ ।
હૃદયમનોરથલાભે હર્ષઃ સઞ્જાયતે પુંસામ્ ॥ ૬૧॥

નયનવદનપ્રિયભાષાલિઙ્ગનૈશ્ચ રોમાઞ્ચૈઃ ।

લલિતૈશ્ચાઙ્ગવિહારૈઃ સ્વેદાદ્યૈરભિનયસ્તસ્ય ॥ ૬૨॥

આવેગો નામ ઉત્પાતવાતવર્ષાકુઞ્જરોદ્ભ્રમણપ્રિયાપ્રિયશ્રવણ-
વ્યસનાભિઘાતાદિર્વિભાવૈઃ સમુત્પદ્યતે । તત્રોત્પાતકૃતો નામ
વિદ્યુદુલ્કાનિર્ઘાતપ્રપતનચન્દ્રસૂર્યોપરાગકેતુદર્શનકૃતઃ ।
તમભિનયેત્સર્વાઙ્ગસ્રસ્તતાવૈમનસ્યમુખવૈવર્ણ્યવિષાદ-
વિસ્મયાદિભિઃ । વાતકૃતં પુનરવકુણ્ઠનાક્ષિપરિમાર્જનવસ્ત્ર-
સઙ્ગૂહનત્વરિતગમનાદિભિઃ । વર્ષકૃતં પુનઃ સર્વાઙ્ગ-
સમ્પિણ્ડનપ્રધાવનચ્છન્નાશ્રયમાર્ગણાદિભિઃ । અગ્નિકૃતં તુ
ધૂમાકુલનેત્રતાઽઙ્ગસઙ્કોચનવિધૂનનાતિક્રાન્તાપક્રાન્તાદિભિઃ ।
કુઞ્જરોદ્ભ્રમણકૃતં નામ ત્વરિતાપસર્પણચઞ્ચલગમન-
ભયસ્તમ્ભવેપથુપશ્ચાદવલોકનવિસ્મયાદિભિઃ । પ્રિયશ્રવણ-
કૃતં
નામાભ્યુત્થાનાલિઙ્ગનવસ્ત્રાભરણપ્રદાનાશ્રુપુલકિતાદિભિઃ ।
અપ્રિયશ્રવણકૃતં નામ ભૂમિપતનવિષમવિવર્તનપરિધાવન-
વિલાપનાક્રન્દનાદિભિઃ । વ્યસનાભિઘાતજં તુ સહસાપસર્પણ-
શસ્ત્રચર્મવર્મધારણગજતુરગરથારોહણસમ્પ્રધારણાદિભિઃ ।
એવમષ્ટવિકલ્પોઽયમાવેગઃ સમ્ભ્રમાત્મકઃ ।
સ્થૈર્યેણોત્તમમધ્યાનાં નીચાનાં ચાપસર્પણૈઃ ॥ ૬૩॥

અત્રાર્યે ભવતઃ -
અપ્રિયનિવેદનાદ્વા સહસા હ્યવધારિતારિવચનસ્ય ।
શસ્ત્રક્ષેપાત્ ત્રાસાદાવેગો નામ સમ્ભવતિ ॥ ૬૪॥

અપ્રિયનિવેદનાદ્યો વિષાદભાવાશ્રયોઽનુભાવસ્ય ।
સહસારિદર્શનાચ્ચેત્પહરણપરિઘટ્ટનૈઃ કાર્યઃ ॥ ૬૫॥

જડતાનામ સર્વકાર્યાપ્રતિપત્તિઃ । ઇષ્ટાનિષ્ટશ્રવણદર્શન-
વ્યાધ્યાદિભિર્વિભાવૈઃ સમુત્પદ્યતે । તામભિનયેદકથનાવિભાષણ-
તૂષ્ણીમ્ભાવાપ્રતિભાઽનિમેષનિરીક્ષણપરવશત્વાદિભિરનુભાવૈઃ ।
અત્રાર્યા ભવતિ -
ઇષ્ટં વાઽનિષ્ટં વા સુખદુઃખે વા ન વેત્તિ યો મોહાત્ ।
તૂષ્ણીકઃ પરવશગો ભવતિ સ જડસંજ્ઞિતઃ પુરુષઃ ॥ ૬૬॥

ગર્વો નામ ઐશ્વર્યકુલરૂપયૌવનવિદ્યાબલધનલાભાદિભિર્વિભાવૈઃ

સમુત્પદ્યતે । તસ્યાસૂયાવજ્ઞાધર્ષણાનુત્તરદાનાસમ્ભાષણા-
ઙ્ગાવલોકન વિભ્રમાપહસનવાક્પારુષ્યગુરુવ્યતિક્રમણાધિ-
ક્ષેપવચનવિચ્છેદાદિભિરનુભાવૈરભિનયઃ પ્રયોક્તવ્યઃ
અત્રાર્યા ભવતિ -
વિદ્યાવાપ્તે રૂપાદૈશ્વર્યાદથ ધનાગમાદ્વાપિ ।
ગર્વઃ ખલુ નીચાનાં દૃષ્ટ્યઙ્ગવિચારણૈઃ કાર્યઃ ॥ ૬૭॥

વિષાદો નામ કાર્યાનિસ્તરણદૈવવ્યાપત્તિસમુત્થઃ ।
તમભિનયેત્સહાયાન્વેષણોપાયચિન્તનોત્સાહવિઘાતવૈમનસ્ય-
નિઃશ્વસિતાદિભિરનુભાવૈરુત્તમમધ્યમાનામ્ । અધમાનાં તુ
વિપરિધાવનાલોકનમુખશોષણસૃક્વપરિલેહનનિદ્રા-
નિઃશ્વસિતધ્યાનાદિભિરનુભાવૈઃ ।
અત્રાર્યા શ્લોકૌ -
કાર્યાનિસ્તરણાદ્વા ચૌર્યાભિગ્રહણરાજદોષાદ્વા ।
દૈવાદર્થવિપત્તેર્ભવતિ વિષાદઃ સદા પુંસામ્ ॥ ૬૮॥

વૈચિત્ર્યોપાયચિન્તાભ્યાં કાર્ય ઉત્તમમધ્યયોઃ ।
નિદ્રાનિઃશ્વસિતધ્યાનૈરધમાનાં તુ યોજયેત્ ॥૬૯॥

ઔત્સુક્યં નામ ઇષ્ટજનવિયોગાનુસ્મરણોદ્યાનદર્શના-
દિભિર્વિભાવૈઃ સમુત્પદ્યતે । તસ્ય દીર્ઘનિઃશ્વસિતાધોમુખ-
વિચિન્તનનિદ્રાતન્દ્રીશયનાભિલાષાદિભિરનુભવૈરભિનયઃ
પ્રયોક્તવ્યઃ ।
અત્રાર્યા ભવતિ -
ઇષ્ટજનસ્ય વિયોગાદૌત્સુક્યં જાયતે હ્યનુસ્મૃત્યા ।
ચિન્તાનિદ્રાતન્દ્રીગાત્રગુરુત્વૈરભિનયોઽસ્ય ॥ ૭૦॥

નિદ્રા નામ દૌર્બલ્યશ્રમક્લમમદાલસ્યચિન્તાઽત્યાહાર-
સ્વભાવાદિભિર્વિભાવૈઃ સમુત્પદ્યતે । તામભિનયેદ્વદન-
ગૌરવશરીરાવલોકનનેત્રઘૂરણનગાત્રવિજૃમ્ભન-
માન્દ્યોચ્છ્વસિતસન્નગાત્રતાઽક્ષિનિમીલનાદિભિરનુભાવૈઃ ।
અત્રાર્યે ભવતઃ -
આલસ્યાદ્દૌર્બલ્યાત્ક્લમાચ્છ્રમાચ્ચિન્તનાત્સ્વભાવાચ્ચ ।
રાત્રૌ જાગરણાદપિ નિદ્રા પુરુષસ્ય સમ્ભવતિ ॥ ૭૧॥

તાં મુખગૌરવગાત્રપ્રતિલોલનનયનમીલનજડત્વૈઃ ।
જૃમ્ભણગાત્રવિમર્દૈરનુભાવૈરભિનયેત્પ્રાજ્ઞઃ ॥ ૭૨॥

અપસ્મારો નામ
દેવયક્ષનાગબ્રહ્મરાક્ષસભૂતપ્રેતપિશાચ-ગ્રહણાનુસ્મરનોચ્છિષ્ટશૂન્યાગારસેવનાશુચિ-
કાલાન્તરાપરિપતનવ્યાધ્યાદિભિર્વિભાવૈઃ સમુત્પદ્યતે ।
તસ્ય સ્ફુરિતનિઃશ્વસિતોત્કમ્પિતધાવનપતનસ્વેદ-
સ્તમ્ભવદનફેનજિહ્વાપરિલેહનાદિભિરનુભાવૈરભિનયઃ
પ્રયોક્તવ્યઃ ।
અત્રાર્યે ભવતઃ -
ભૂતપિશાચગ્રહણાનુસ્મરણોચ્છિષ્ટશૂન્યગૃહગમનાત્ ।
કાલાન્તરાતિપાતાદશુચેશ્ચભવત્યપસ્મારઃ ॥ ૭૩॥

સહસા ભૂમૌ પતનં પ્રવેપનં વદનફેનમોક્ષશ્ચ ।
નિઃસંજ્ઞસ્યોત્થાનં રૂપાણ્યેતાન્યપસ્મારે ॥ ૭૪॥

સુપ્તં નામ નિદ્રાભિભવવિષયોપગમનક્ષિતિતલશયન-
પ્રસારણાનુકર્ષણાદિભિર્વિભાવૈઃ સમુત્પદ્યતે
નિદ્રાસમુત્થમ્ । તદુચ્છ્વસિતંસન્નગાત્રાક્ષિનિમીલન-
સર્વેન્દ્રિય સમ્મોહનોત્સ્વપ્રાયિતાદિભિરનુભાવૈરભિનયેત્ ।
અત્રાર્યે ભવતઃ -
નિદ્રાભિભવેન્દ્રિયોપરમણમોહાઇર્હવેત્સુપ્તમ્ ।
અક્ષિનિમીલનોચ્છ્વસનૈઃ સ્વપ્રાયિતજલ્પિતૈઃ કાર્યઃ ॥ ૭૫॥

સોચ્છ્વાસૈર્નિઃશ્વાસૈર્મન્દાક્ષિનિમીલનેન નિશ્ચેષ્ટઃ ।
સર્વેન્દ્રિયસમ્મોહાત્સુપ્તં સ્વપ્નૈશ્ચ યુઞ્જીત ॥ ૭૬॥

વિબોધો નામ આહારપરિણામનિદ્રાચ્છેદસ્વપ્નાન્ત-
તીવ્રશબ્દશ્રવણાદિભિર્વિભાવૈઃ સમુત્પદ્યતે ।
તમભિનયેજ્જૃમ્ભણાક્ષિપરિમર્દનશયનમોક્ષણાદિભિરનુભાવૈઃ ।
અત્રાર્યા ભવતિ -
આહારવિપરિણામાચ્છબ્દસ્પર્શાદિભિશ્ચ સમ્ભૂતઃ ।
પ્રતિબોધસ્ત્વભિનેયો જૃમ્ભણવદનાક્ષિપરિમર્દૈઃ ॥ ૭૭॥

અમર્ષો નામ વિદ્યૈશ્વર્યશૌર્યબલાધિકૈરધિક્ષિપ્તસ્યાવમાનિતસ્ય વા
સમુત્પદ્યતે । તમભિનયેચ્છિરઃકમ્પનપ્રસ્વેદનાધોમુખચિન્તન-

ધ્યાનાધ્યવસાયોપાયસહાયાન્વેષણાદિભિરનુભાવૈઃ ।
અત્ર શ્લોકૌ -
આક્ષિપ્તાનાં સભામધ્યે વિદ્યાશૌર્યબલાધિકૈઃ ।
નૃણામુત્સાહસંયોગાદમર્ષો નામ જાયતે ॥ ૭૮॥

ઉત્સાહાધ્યવસાયાભ્યામધોમુખવિચિન્તનૈઃ ।
શિરઃપ્રકમ્પસ્વેદાદ્યૈસ્તં પ્રયુઞ્જીત પણ્ડિતઃ ॥ ૭૯॥

અવહિત્થં નામ આકારપ્રચ્છાદનાત્મકમ્ । તચ્ચ
લજ્જાભયાપજય-
ગૌરવજૈહ્મ્યાદિભિર્વિભાવિઃ સમુત્પદ્યતે ।
તસ્યાન્યથાકથનાવલોકિત-
કથાભઙ્ગકૃતકધૈર્યાદિભિરનુભાવૈરભિનયઃ પ્રયોક્તવ્યઃ ।
અત્ર શ્લોકો ભવતિ -
ધાર્ષ્ટ્યજૈહ્મ્યાદિસમ્ભીતમવહિત્થં ભયત્મકમ્ ।
તચ્ચાગણનયા કાર્યં નાતીવોત્તરભાષણાત્ ॥ ૮૦॥

ઉગ્રતા આમ ચૌર્યાભિગ્રહાણનૃપાપરાધાસત્પ્રલાપાદિભિર્વિભાવૈઃ
સમુત્પદ્યતે ।
તાં ચ વધબન્ધનતાડનનિર્ભત્સનાદિભિરનુભાવૈરભિનયેત્ ।
અત્રાર્યા ભવતિ -
ચૌર્યાભિગ્રહનવશાન્નૃપાપરાધાદથોગ્રતા ભવ્તિ ।
વધબન્ધતાડનાદિભિરનુભાવૈરભિનયસ્તસ્યાઃ ॥ ૮૧॥

ભવતિ ચાત્ર શ્લોકઃ -
નાનાશાત્રાર્થબોધેન મતિઃ સંજાયતે નૃણામ્ ।
શિષ્યોપદેશાર્થકૃતસ્તસ્યાસ્ત્વભિનયો ભવેત્ ॥૮૨॥

વ્યાધિર્નામ વાતપિત્તકફસન્નિપાતપ્રભવઃ । તસ્ય જ્વરાદયો
વિશેષાઃ । જ્વરસ્તુ દ્વિવિધઃ સશીતઃ સદાહશ્ચ ।
તત્ર સશીતો નામ પ્રવેપિતસર્વાઙ્ગોત્કમ્પનનિકુઞ્ચના-
ઞ્ચભિલાષરોમાઞ્ચહનુવલનનાસાવિકૂનનમુખ-
શોષણપરિદેવિતાદિભિરનુભાવૈરભિનેયઃ । સદાહો નામ
વિક્ષિપ્તાઙ્ગકરચરણભૂમ્યભિલાષાનુલેપનશીતાભિ-
લાષપરિદેવનમુખશોષોત્ક્રુષ્ટાદિભિરનુભાવૈઃ ।

યે ચાન્યે વ્યાધયસ્તેઽપિ ખલુ મુખવિકૂણનગાત્ર-
સ્તમ્ભસ્રસ્તાક્ષિનિઃશ્વસનસ્તનિતોત્ક્રુષ્ટવેપના-
દિભિરનુભાવૈરભિનેયાઃ ।
અત્ર શ્લોકો ભવતિ -
સમાસતસ્તુ વ્યાધીનાં કર્તવ્યોઽભિનયો બુધૈઃ ।
સ્રસ્તાઙ્ગગાત્રવિક્ષેપૈસ્તથા મુખવિકૂણનૈઃ ॥ ૮૩ ॥

ઉન્માદો નામ ઇષ્ટજનવિયોગવિભવનાશાભિઘાત-
વાતપિત્તશ્લેષ્મપ્રકોપાદિભિર્વિભાવૈરુત્પદ્યતે ।
તમનિમિત્તહસિતરુદિતોત્ક્રુષ્ટાસમ્બદ્ધપ્રલાપશયિતોપવિષ્ટોત્થિત-
પ્રધાવિતનૃત્તગીતપઠિતભસ્મપાંસ્વવધૂલનતૃણનિર્માલ્યકુચેલ-
ચીરઘટકકપાલશરાવાભરણધારણોપભોગૈરનેકૈશ્ચાનવસ્થિતૈશ્ચેષ્ટા-
નુકરણાદિભિરનુભાવૈરભિનયેત્ ।
અત્રાર્યે ભવતઃ -
ઇષ્ટજનવિભવનાશાદભિઘાતાદ્વાતપિત્તકફકોપાત્ ।
વિવિધાચ્ચિત્તવિકારાદુન્માદો નામ સમ્ભવતિ ॥ ૮૪ ॥

અનિમિત્તરુદિતહસિતોપવિષ્ટગીતપ્રધાવિતોત્ક્રુષ્ટૈઃ ।
અન્યૈશ્ચ વિકારૈરકૃતૈરુન્માદં સમ્પ્રયુઞ્જીત ॥ ૮૫ ॥

મરણં નામ વ્યાધિજમભિઘાતજઞ્ચ । તત્ર
યદાન્ત્રયકૃચ્છૂલદોષવૈષમ્ય-
ગણ્ડપિટકજ્વરવિષૂચિકાદિભિરુત્પદ્યતે તદ્વ્યાધિપ્રભવમ્ ।
અભિઘાતજં તુ
શસ્ત્રાહિદંશવિષપાનશ્વાપદગજતુરગરથપશુયાનપાત-
વિનાશપ્રભવમ્ । એતયોરભિનયવિશેષાન્વક્ષ્યામઃ -
તત્ર વ્યાધિજં વિષણ્ણગાત્રાવ્યાયતાઙ્ગવિચેષ્ટિતનિમીલિતનયન-
હિક્કાશ્વાસોપેતાનવેક્ષિતપરિજનાવ્યક્તાક્ષરકથનાદિભિરનુભાવૈરભિનયેત્
।
અત્ર શ્લોકો ભવતિ -
વ્યાધીનામેકભાવો હિ મરણાભિનયઃ સ્મૃતઃ ।
વિષણ્ણગાત્રૈર્નિશ્ચેષ્ટૈરિન્દ્રિઅયૈશ્ચ વિવર્જિતઃ ॥ ૮૬ ॥

અભિઘાતજે તુ નાનાપ્રકારાભિનયવિશેષાઃ।

શસ્ત્રક્ષતાહિદષ્ટવિષપીત-
ગજાદિપતિતશ્વાપદહતાઃ । યથા તત્ર શસ્ત્રક્ષતે તાવત્સહસા
ભૂમિપતનવેપન-
સ્ફુરણાદિભિરભિનયઃ પ્રયોક્તવ્યઃ । અહિદષ્ટવિષપીતયોર્વિષયોગો
યથા
કાર્શ્યવેપથુવિદાહહિક્કાફેનસ્કન્ધભઙ્ગજડતામરણાનીત્યષ્ટૌ
વિષવેગાઃ ।
અત્ર શ્લોકૌ ભવતઃ -
કાર્શ્યં તુ પ્રથમે વેગે દ્વિતીયે વેપથુર્ભવેત્ ।
દાહં તૃતીયે હિક્કાં ચ ચતુર્થે સમ્પ્રયોજયેત્ ॥ ૮૭॥

ફેનઞ્ચ પઞ્ચમે કુર્યાત્ષષ્ઠે સ્કન્ધસ્ય ભઞ્જનમ્ ।
જડતાં સપ્તમે કુર્યાદષ્ટમે મરણં ભવેત્ ॥ ૮૮॥

અત્રાર્યા ભવતિ -
શ્વાપદગજતુરગરથોદ્ભવં તુ પશુયાનપતનજં વાઽપિ ।
શાસ્ત્રક્ષતવત્કુર્યાદનવેક્ષિતગાત્રસઞ્ચારમ્ ॥ ૮૯॥

ઇત્યેવ મરણં જ્ઞેયં નાનાવસ્થાન્તરાત્મકમ્ ।
પ્રયોક્તવ્યં બુધૈઃ સમ્યગ્યથા ભવાઙ્ગચેષ્ટિતૈઃ ॥ ૯૦॥

ત્રાસો નામ વિદ્યુદુલ્કાશનિપાતનિર્ઘાતામ્બુધરમહાસત્ત્વપશુ-
રવાદિભિર્વિભાવૈરુત્પદ્યતે । તમભિનયેત્સંક્ષિપ્તાઙ્ગોત્કમ્પનવેપથુ-
સ્તમ્ભરોમાઞ્ચગદ્ગદપ્રલાપાદિભિરનુભાવૈઃ ।
અત્ર શ્લોકો ભવતિ -
મહાભૈરવનાદધૈસ્ત્રાસઃ સમુપજાયતે ।
સ્રસ્તાઙ્ગાક્ષિનિમેષૈશ્ચ તસ્ય ત્વભિનયો ભવેત્ ॥ ૯૧॥

વિતર્કો નામ સન્દેહવિમર્શવિપ્રતિપત્ત્યાદિભિર્વિભાવૈરુત્પદ્યતે ।
તમભિન-
યેદ્વિવિધવિચારિતપ્રશ્નસમ્પ્રધારણમન્ત્રસઙ્ગૂહનાદિભિરનુભાવૈઃ
।
અત્ર શ્લોકો ભવતિ -
વિચારણાદિસમ્ભૂતઃ સન્દેહાતિશયાત્મકઃ ।
વિતર્કઃ સોઽભિનેયસ્તુ શિરોભ્રૂક્ષેપકમ્પનૈઃ ॥ ૯૨॥

એવમેતે ત્રયસ્ત્રિંશદ્વ્યભિચારિણો ભાવા દેશકાલાવસ્થા-
નુરૂપ્યેણામગતપરગતમધ્યસ્થા ઉત્તમમધ્યમાધમૈઃ
સ્ત્રીપુંસૈઃ સ્વપ્રયોગવશાદુપપાદ્યા ઇતિ ।
ત્રયસ્ત્રિંશદિમે ભાવા વિજ્ઞેયા વ્યભિચારિણઃ ।
સાત્ત્વિકાંસ્તુ પુનર્ભાવાન્પ્રવક્ષ્યામ્યનુપૂર્વશઃ ॥ ૯૩॥

અત્રાહ - કિમન્યે ભાવાઃ સત્ત્વેન વિનાઽભિનીયન્તે યસ્માદુચ્યતે
એતે સાત્ત્વિકા ઇતિ । અત્રોચ્યતે -
ઇહ હિ સત્ત્વં નામ મનઃપ્રભવમ્ । તચ્ચ સમાહિતમનસ્ત્વાદુચ્યતે
।
મનસઃ સમાધૌ સત્ત્વનિષ્પત્તિર્ભવતિ । તસ્ય ચ યોઽસૌ સ્વભાવો
રોમાઞ્ચાશ્રુવૈવર્ણ્યાદિલક્ષણો યથાભાવોપગતઃ સ ન
શક્યોઽન્યમનસા
કર્તુમિતિ । લોકસ્વભાવાનુકરણત્વાચ્ચ નાટ્યસ્ય સત્ત્વમીપ્સિતમ્ ।
કો દૃષ્ટાન્તઃ - ઇહ હિ નાટ્યાધર્મિપ્રવૃત્તાઃ સુખદુઃખકૃતા
ભાવાસ્તથા
સત્ત્વવિશુદ્ધાઃ કાર્યા યથા સરૂપા ભવન્તિ । તત્ર દુઃખં નામ
રોદનાત્મકં
તત્કથમદુઃખિતેન સુખં ચ પ્રહર્ષાત્મકમસુખિતેન વાભિનેયમ્ ।
એતદેવાસ્ય સત્ત્વં યત્ દુઃખિતેન સુખિતેન વાઽશ્રુરોમાઞ્ચૌ
દર્શયિતવ્યૌ
ઇતિ કૃત્વા સાત્ત્વિકા ભાવા ઇત્યભિવ્યાખ્યાતાઃ । ત ઇમે -
સ્તમ્ભઃ સ્વેદોઽથ રોમાઞ્ચઃ સ્વરભેદોઽથ વેપથુઃ ।
વૈવર્ણ્યમશ્રુપ્રલય ઇત્યષ્ટૌ સાત્ત્વિકા મતાઃ ॥ ૯૪॥

અત્રાર્યાઃ । તત્ર -
ક્રોધભયહર્ષલજ્જાદુઃખશ્રમરોગતાપઘાતેભ્યઃ ।
વ્યાયામક્લમઘર્મૈઃ સ્વેદઃ સમ્પીડનાચ્ચૈવ ॥ ૯૫॥

હર્ષભયશોકવિસ્મયવિષાદરોષાદિસમ્ભવઃ સ્તમ્ભઃ ।
શીતભયહર્ષરોષસ્પર્શજરારોગજઃ કમ્પઃ ॥ ૯૬॥

આનન્દામર્ષાભ્યાં ધૂમાઞ્જનજૃમ્ભણાદ્ભયાચ્છોકાત્ ।
અનિમેષપ્રેક્ષણતઃ શીતાદ્રોગાદ્ભવેદશ્રુ ॥ ૯૭॥

શીતક્રોધભયશ્રમરોગક્લમતાપજં ચ વૈવર્ણ્યમ્ ।
સ્પર્શભયશીતહર્ષાત્ ક્રોધાદ્રોગાચ્ચ રોમાઞ્ચઃ ॥ ૯૮॥

સ્વરભેદો ભયહર્ષક્રોધજરારૌક્ષ્યરોગમદજનિતઃ ।
શ્રમમૂર્છમદનિદ્રાભિઘાતમોહાદિભિઃ પ્રલયઃ ॥ ૯૯॥

એવમેતે બુધૈર્જ્ઞેયા  ભાવા હ્યષ્ટૌ તુ સાત્ત્વિકાઃ ।
કર્મ ચૈષાં પ્રવક્ષ્યામિ રસભાવાનુભાવકમ્ ॥ ૧૦૦॥

નિઃસંજ્ઞો નિષ્પ્રકમ્પશ્ચ સ્થિતઃ શૂન્યજડાકૃતિઃ ।
સ્કન્નગાત્રતયા ચૈવ સ્તમ્ભં ત્વભિનયેદ્બુધઃ ॥ ૧૦૧॥

વ્યજનગ્રહણાચ્ચાપિ સ્વેદાપનયનેન ચ ।
સ્વેદસ્યાભિનયો યોજ્યસ્તથા વાતાભિલાષતઃ ॥ ૧૦૨॥

મુહુઃ કણ્ટિકિતત્વેન તથોલ્લુકસનેન ચ ।
પુલકેન ચ રોમાઞ્ચં ગાત્રસ્પર્શેન દર્શયેત્ ॥ ૧૦૩॥

સ્વરભેદોઽભિનેતવ્યો ભિન્નગદ્ગદનિસ્વનૈઃ ।
વેપનાત્સ્ફુરણાત્કમ્પાદ્વેપથું સમ્પ્રદર્શયેત્ ॥ ૧૦૪॥

મુખવર્ણપરાવૃત્ત્યા નાડીપીડનયોગતઃ ।
વૈવર્ણ્યમભિનેતવ્યં પ્રયત્નાત્તદ્ધિ દુષ્કરમ્ ॥ ૧૦૫॥

બાષ્પામ્બુપ્લુતનેત્રત્વાન્નેત્રસંમાર્જનેન ચ ।
મુહુરશ્રુકણાપાતૈરસ્રં ત્વભિનયેદ્બુધઃ ॥૧૦૬॥

નિશ્ચેષ્ટો નિષ્પ્રકમ્પત્વાદવ્યક્તશ્વસિતાદપિ ।
મહીનિપતનાચ્ચાપિ પ્રલયાભિનયો ભવેત્ ॥ ૧૦૭॥

એકોનપઞ્ચાશદિમે યથાવદ્ભાવાસ્ત્ર્યવસ્થા ગદિતા મયેહ ।
ભૂયશ્ચ યે યત્ર રસે નિયોજ્યાસ્તાન્ શ્રોતુમર્હન્તિ ચ વિપ્રમુખ્યાઃ
॥ ૧૦૮॥

[ અત્ર શ્લોકાઃ -
શઙ્કાવ્યાધિસ્તથાગ્લાનિશ્ચિન્તાસૂયા ભયં તથા ।
વિસ્મયશ્ચ વિતર્કશ્ચ સ્તમ્ભશ્ચપલતા તથા ॥

રોમાઞ્ચહર્ષૌ નિદ્રા ચ તથોન્માદમદાવપિ ।
સ્વેદશ્ચૈવાવહિત્થં ચ પ્રલયો વેપથુસ્તથા ॥

વિષાદશ્રમનિર્વેદા ગર્વાવેગૌ ધૃતિઃ સ્મૃતિઃ ।
મતિર્મોહો વિબોધશ્ચ સુપ્તમૌત્સુક્યવર્જિતે ॥

ક્રોધામર્ષૌ ચ હાસશ્ચ શોકોઽપસ્માર એવ ચ ।
દૈન્યં ચ મરણં ચૈવ રતિરુત્સાહસંયુતા ॥

ત્રાસવૈવર્ણ્યરુદિતૈઃ સ્વરભેદઃ શમોઽપિ ચ ।
જડતા ચ તથા ષટ્ ચ ચત્વારિંશત્પ્રકીર્તિતાઃ ॥ ]
આલસ્યૌગ્ર્યજુગુપ્સાખ્યૈરેવં ભાવૈસ્તુ વર્જિતાઃ ।
ઉદ્ભાવયન્તિ શ‍ृઙ્ગારં સર્વે ભાવાઃ સ્વસંજ્ઞયા ॥ ૧૦૯ ॥

[ યથાઽવસરમેતે હિ સ્થાયિસઞ્ચારિસત્ત્વજાઃ ।
ઉદ્દીપયન્તિ શ‍ृઙ્ગારં રસમાસાદ્ય સંજ્ઞિતમ્ ॥ ]
ગ્લાનિઃ શઙ્કા હ્યસૂયા ચ શ્રમશ્ચપલતા તથા ।
સુપ્તં નિદ્રાવહિત્થં ચ હાસ્યે ભાવાઃ પ્રકીર્તિતાઃ ॥ ૧૧૦ ॥

નિર્વેદશ્ચૈવ ચિન્તા ચ દૈન્યં ગ્લાન્યાસ્રમેવ ચ
જડતા મરણં ચૈવ વ્યાધિશ્ચ કરુણે સ્મૃતાઃ ॥ ૧૧૧ ॥

ગર્વોઽસૂયા મદોત્સાહાવાવેગોઽમર્ષ એવ ચ ।
ક્રોધશ્ચપલતૌગ્ર્યં ચ વિજ્ઞેયા રૌદ્રસમ્ભવાઃ ॥ ૧૧૨ ॥

અસમ્મોહસ્તથોત્સાહ આવેગો હર્ષ એવ ચ ।
મતિશ્ચૈવ તથોગ્રત્વમમર્ષો મદ એવ ચ ॥ ૧૧૩ ॥

રોમાઞ્ચઃ સ્વરભેદશ્ચ ક્રોધોઽસૂયા ધૃતિસ્તથા ।
ગર્વશ્ચૈવ વિતર્કશ્ચ વીરે ભાવા ભવન્તિ હિ ॥ ૧૧૪ ॥

સ્વેદશ્ચ વેપથુશ્ચૈવ રોમાઞ્ચો ગદ્ગદસ્તથા ।
ત્રાસશ્ચ મરણશ્ચૈઅવ વૈવર્ણ્યં ચ ભયાનકે ॥ ૧૧૫ ॥

અપસ્મારસ્તથોન્માદો વિષાદો મદ એવ ચ ।
મૃત્યુર્વ્યાધિર્ભયં ચૈવ ભાવા બીભત્સસંશ્રયાઃ ॥ ૧૧૬ ॥

સ્તમ્ભઃ સ્વેદશ્ચ મોહશ્ચ રોમાઞ્ચો વિસ્મયસ્તથા ।
આવેગો જડતા હર્ષો મૂર્છા ચૈવાદ્ભુતાશ્રયાઃ ॥ ૧૧૭ ॥

યે ત્વેતે સાત્ત્વિકા ભાવા નાનાભિનયસંશ્રિતાઃ ।
રસેષ્વેતેષુ સર્વે તે જ્ઞેયા નાટ્યપ્રયોક્તૃભિઃ ॥ ૧૧૮ ॥

ન હ્યેકરસજં કાવ્યં કિઞ્ચિદસ્તિ પ્રયોગતઃ ।
ભાવો વાપિ રસો વાપિ પ્રવૃત્તિર્વૃત્તિરેવ ચ ॥ ૧૧૯॥

[ બહૂનાં સમવેતાનાં રૂપં યસ્ય ભવેદ્બહુ ।
સ મન્તવ્યો રસઃ સ્થાયી શેષાઃ સઞ્ચારિણો મતાઃ ॥

દીપયન્તઃ પ્રવર્તન્તે યે પુનઃ સ્થાયિનં રસમ્ ।
તે તુ સઞ્ચારિણો જ્ઞેયાસ્તે હિ સ્થાયિત્વમાગતાઃ ॥

વિભાવાનુભાવયુતો હ્યઙ્ગવસ્તુસમાશ્રયઃ ।
સંચારિભિસ્તુ સંયુક્તઃ સ્થાય્યેવ તુ રસો ભવેત્ ॥

સ્થાયી સત્ત્વાતિરેકેણ પ્રયોક્તવ્યઃ પ્રયોક્તૃભિઃ ।
સઞ્ચાર્યાકારમાત્રેણ સ્થાયી યસ્માદવસ્થિતઃ ॥

યે ત્વેતે સાત્ત્વિકા ભાવા નાનાભિનયયોજિતાઃ ।
રસેષ્વેતેષુ સર્વેષુ તે જ્ઞેયા નાટ્યકોવિદૈઃ ॥

ન હ્યેકરસજં કાવ્યં નૈકભાવૈકવૃત્તિકમ્ ।
વિમર્દે રાગમાયાતિ પ્રયુક્તં હિ પ્રયત્નતઃ ॥

ભાવા વાઽપિ રસા વાઽપિ પ્રવૃત્તિર્વૃત્તિરેવ વા ।
બીભત્સાદ્ભુતશાન્તાનાં ત્રૈવિધ્યં નાત્ર કથ્યતે ॥

ષણ્ણાં રસાનાં ત્રૈવિધ્યં નાનાભાવારસાન્વિતમ્ ।
સત્ત્વપ્રયોજિતો હ્યર્થઃ પ્રયોગોઽત્ર વિરાજતે ॥

વિદિત્વા હિ વિરાજન્તે લોકે ચિત્રં હિ દુર્લભમ્ ॥ ]
નાનાભાવાર્થસમ્પન્નાઃ સ્થાયિસત્ત્વાભિચારિણઃ ।
પુષ્પાવકીર્ણાઃ કર્તવ્યાઃ કાવ્યેષુ હિ રસા બુધૈઃ ॥ ૧૨૦॥

એવં રસાશ્ચ ભાવાશ્ચ વ્યવસ્થા નાટકે સ્મૃતાઃ ।
ય એવમેતાઞ્જાનાતિ સ ગચ્છેત્સિદ્ધિમુત્તમામ્ ॥ ૧૨૧॥

ઇતિ શ્રીભારતીયે નાટ્યશાસ્ત્રે ભાવવ્યઞ્જકો નામ સપ્તમોઽધ્યાયઃ ॥

Encoded by Padmakar Dadegaonkar dadegaonkar@yahoo.com

*Natya Shastra Chapter 7*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*